परीक्षालेखनरताः छात्राः

## विद्यावारिधिकार्यशाला (Ph.D. Course Work)




विद्यावारिधिकार्यशालायाः दृश्यम्

विद्यावारिधिच्छात्रान् उद्बोधयन्तः प्रो. विनोदकुमारझा महाभागाः

विश्वविद्यालयानुदानायोगस्य (U.G.C.) नियमानुसारं श्रीसोमनाथ-संस्कृतविश्वविद्यालयेन २०१७-१८ इति शैक्षणिकवर्षस्य कृते विद्यावारिधि-प्रवेशपरीक्षायाः आयोजनं कृतम् । विद्यावारिधिप्रवेशपरीक्षार्थं शताधिकं द्वे (१०२) शोधार्थिनः पञ्जीकरणं कृतवन्तः । तेषां अष्टादश (१८) शोधार्थिनः उत्तीर्णाः जाताः । २०१५-१६ शैक्षणिकवर्षस्य एकः (१) तथा २०१७-१८ शैक्षणिकवर्षस्य अष्टादश (१८) शोधार्थिनां आहत्य एकोनविंशतिः (१९) शोधार्थिनां कृते विद्यावारिधिकार्यशालायाः (Ph.D. Course Work) आयोजनं सञ्जातम् । विश्वविद्यालया-नुदानायोगस्य नियमानुसारं षष्ठिहोरात्मिका (60 Hours) विद्यावारिधिकार्यशालायाः आयोजनं १५-०६-२०१७ तः २४-०६-२०१७ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य परिसरे सञ्जातम् । तत्र सप्तदश (१७) शोधार्थिनः उपस्थिताः आसन् । एतस्याः कार्यशालायाः अतिथिवक्तारः प्रो. देवेन्द्रनाथपांडेयः, प्रो. विनोदकुमारझा, प्रो. अर्चनादुबे, प्रि. डॉ. नरेन्द्रकुमारपण्ड्या, डॉ. महेन्द्रकुमारदवे, डॉ. प्रतापपण्ड्या, डॉ. ललितकुमारपटेलः, डॉ. पङ्कजरावलः, डॉ. शत्रुघ्नपाणिग्राही, डॉ. डी. एस. मोकरीया, डॉ. जानकीशरणआचार्यः, डॉ. दीपेशकतिरा, डॉ. कार्तिकपण्ड्या, श्रीरविन्द्रकाले, श्रीहरेशखेरः, डॉ. रामपालशुक्लः, डॉ. अमृतलालभोगायता, प्रो. निरंजनपटेलः, श्रीजयदीपरामाणी चासन् । तैः उचितं व्याख्यानं दत्तम् । अस्याः कार्यशालायाः शोधार्थिनः भागवतकोईराला, दवेनेहलः पण्ड्यायोगेशः, जोषीहार्दिकः, जानीस्वस्तिकः, ईन्दुशेखर एच.एम., पुष्पेन्दुदासः, त्रिवेदीराहुलः, जोषीभावेशः, महेताविशालः, पण्डाकृष्णः, ठाकरसागरः, महेतानैमेषः, कामनकौशिकः, भट्टहेमराजः, जादवविपुलः, साधुलक्ष्मणप्रकाशदासः चासन् । अस्याः कार्यशालायाः संयोजकः डॉ. कार्तिकपण्ड्या एवं सहायकः श्री हितेशजानी चास्ताम् ।

CS Scanned with CamScanner

# सम्पन्ना विद्यावारिधिकार्यशाला (Ph. D. Coursework)



विश्वविद्यालयानुदानायोगस्य नियमानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २०१९-२० तमशैक्षिकवर्षस्य कृते विद्यावारिधिप्रवेशपरीक्षायाः आयोजनं १५-१०-२०१९ एवं च २१-१०-२०१९ दिनाङ्के अकारि। अस्यां परीक्षायां विंशतिशोधार्थिनः उत्तीर्णाः अभूवन्, येषां कृते विश्वविद्यालयानुदानायोगनियमानुगुणं षष्टिहोरात्मिका विद्यावारिधिकार्यशाला श्रीसोमनाथ-संस्कृतविश्वविद्यालयपरिसरे २०-०१-२०२० तः २९-०१-२०२० यावत् समायोजिता। अस्यां कर्यशालायां नवदश शोधचिकीर्षवः उपस्थिताः आसन्। अत्र विशिष्टवक्तृरूपेण प्रो. गोपबन्धु मिश्रः, प्रो. देवेन्द्रनाथ पाण्डेयः, प्रो. अर्चना दुबे, प्रो. विनोद कुमार झा, डॉ. नरेन्द्रकुमार पण्ड्या, प्रो. महेन्द्रकुमार दवे, डॉ. शत्रुघ्न पाणिग्राही, डॉ. पङ्कजकुमार रावलः, डॉ. डी. एम. मोकरिया, डॉ. दीपेश कतिरा, डॉ. कार्तिक पण्ड्या, डॉ. योगेश पटेलः, डॉ. बी. उमामहेश्वरी, डॉ. जानकीशरणः आचार्यः, डॉ. जयेशकुमार मुंगरा, डॉ. रमेशचन्द्र शुक्लः, प्रो. पीटरशार्फ़, श्रीरवीन्द्र काले, श्रीहरेश खेरः च स्वविशिष्टव्याख्यानेन शोधविद्यार्थिनः उदबोधयन्। अस्याः कर्यशालायाः संयोजनं डॉ. कर्तिक पण्ड्या अकरोत्।

Scanned with CamScanner